# ॥ શ્રીઅન્નપૂર્ણાષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

.. shrIannapUrNAShTottarashatanAmastotram ..

sanskritdocuments.org

August 20, 2017

# .. shrIannapUrNAShTottarashatanAmastotram ..

## ॥ શ્રીઅન્નપૂર્ણાષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : annapUrNAShTottarashatanAmastotram

File name : annapUrNAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, devii, pArvatI, annapUrNa, stotra

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, NA

Description-comments : shrIbrahmottarakhaNDe AgamapryakhyAtishivarahasye

Latest update : May 2, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીઅન્નપૂર્ણાષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઅન્નપૂર્ણાવિશ્વનાથાભ્યાં નમઃ ॥

અસ્ય શ્રીઅન્નપૂર્ણાષ્ટોત્તરશતનામસ્તોત્રમન્ત્રસ્ય
ભગવાન્ શ્રીબ્રહ્મા ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીઅન્નપૂર્ણેશ્વરી દેવતા ।
સ્વધા બીજમ્ । સ્વાહા શક્તિઃ । ૐ કીલકમ્ ।
મમ સર્વાભીષ્ટપ્રસાદસિદ્ધ્યર્થે પાઠે વિનિયોગઃ ।
ૐ અન્નપૂર્ણા શિવા દેવી ભીમા પુષ્ટિસ્સરસ્વતી ।
સર્વજ્ઞા પાર્વતી દુર્ગા શર્વાણી શિવવલ્લભા ॥ ૧॥

વેદવેદ્યા મહાવિદ્યા વિદ્યાદાત્રી વિશારદા ।
કુમારી ત્રિપુરા બાલા લક્ષ્મીશ્શ્રીર્ભયહારિણી ॥ ૨॥

ભવાની વિષ્ણુજનની બ્રહ્માદિજનની તથા ।
ગણેશજનની શક્તિઃ કુમારજનની શુભા ॥ ૩॥

ભોગપ્રદા ભગવતી ભક્તાભીષ્ટપ્રદાયિની ।
ભવરોગહરા ભવ્યા શુભ્રા પરમમઙ્ગલા ॥ ૪॥

ભવાન્ની ચઞ્ચલા ગૌરી ચારુચન્દ્રકલાધરા ।
વિશાલાક્ષી વિશ્વમાતા વિશ્વવન્દ્યા વિલાસિની ॥ ૫॥

આર્યા કલ્યાણનિલયા રુદ્રાણી કમલાસના ।
શુભપ્રદા શુભાવર્તા વૃત્તપીનપયોધરા ॥ ૬॥

અમ્બા સંહારમથની મૃડાની સર્વમઙ્ગલા ।
વિષ્ણુસંસેવિતા સિદ્ધા બ્રહ્માણી સુરસેવિતા ॥ ૭॥

પરમાનન્દદા શાન્તિઃ પરમાનન્દરૂપિણી ।
પરમાનન્દજનની પરાનન્દપ્રદાયિની ॥ ૮॥

પરોપકારનિરતા પરમા ભક્તવત્સલા ।
પૂર્ણચન્દ્રાભવદના પૂર્ણચન્દ્રનિભાંશુકા ॥ ૯॥

શુભલક્ષણસમ્પન્ના શુભાનન્દગુણાર્ણવા ।

શુભસૌભાગ્યનિલયા શુભદા ચ રતિપ્રિયા ॥ ૧૦॥

ચણ્ડિકા ચણ્ડમથની ચણ્ડદર્પનિવારિણી ।
માર્તાણ્ડનયના સાધ્વી ચન્દ્રાગ્નિનયના સતી ॥ ૧૧॥

પુણ્ડરીકહરા પૂર્ણા પુણ્યદા પુણ્યરૂપિણી ।
માયાતીતા શ્રેષ્ઠમાયા શ્રેષ્ઠધર્માત્મવન્દિતા ॥ ૧૨॥

અસૃષ્ટિસ્સઙ્ગરહિતા સૃષ્ટિહેતુઃ કપર્દિની ।
વૃષારૂઢા શૂલહસ્તા સ્થિતિસંહારકારિણી ॥ ૧૩॥

મન્દસ્મિતા સ્કન્દમાતા શુદ્ધચિત્તા મુનિસ્તુતા ।
મહાભગવતી દક્ષા દક્ષાધ્વરવિનાશિની ॥ ૧૪॥

સર્વાર્થદાત્રી સાવિત્રી સદાશિવકુટુમ્બિની ।
નિત્યસુન્દરસર્વાઙ્ગી સચ્ચિદાનન્દલક્ષણા ॥ ૧૫॥

નામ્નામષ્ટોત્તરશતમ્બાયાઃ પુણ્યકારણમ્ ।
સર્વસૌભાગ્યસિદ્ધ્યર્થં જપનીયં પ્રયત્નતઃ ॥ ૧૬॥

એતાનિ દિવ્યનામાનિ શ્રુત્વા ધ્યાત્વા નિરન્તરમ્ ।
સ્તુત્વા દેવીઞ્ચ સતતં સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૭॥

॥ ઇતિ શ્રીબ્રહ્મોત્તરખણ્ડે આગમપ્રખ્યાતિશિવરહસ્યે
શ્રીઅન્નપૂર્ણાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, NA

.. shrIannapUrNAShTottarashatanAmastotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*